309sk21

# 21

# शल्यचिकित्साजनकः सुश्रुतः

भवन्तः जानन्ति यत् रुग्णाः जनाः वैद्यं चिकित्सकं वा उपगछन्ति। वैद्यः तेषां रोगस्य निदानं कृत्वा तेभ्यः औषधं यच्छति तेषां रोगं च अपनयति। यदा कस्याञ्चिद् दुर्घटनायाम् अङ्गभङ्गः भवति अथवा शरीरे व्रणादयः जायन्ते तदा वयं किं कुर्मः? वयं रोगिजनं कस्यचित् कुशलशल्यचिकित्सकस्य समीपं नयामः। सः पीडितानि भग्नानि अङ्गानि शल्यक्रियाद्वारा उद्घाट्य तेषाम् अस्थ्नां पुनः स्थापनां कृत्वा त्वचः सीव्यति। कालेन जनः स्वास्थ्यं लभते। किं जानन्ति भवन्तः यत् शल्यक्रियायाः जनकः सुश्रुतः आसीत्। सः प्राचीन–भारतीयवैज्ञानिकः आसीत्। स न केवलं शल्यक्रियायाः अपितु 'प्लास्टिक सर्जरी' नाम त्वक्प्रत्यारोपणस्य अपि जनकः कथ्यते। अत्र वयं तस्य विषये एव पठामः।

## उद्देश्यानि


इमं पाठं पठित्वा भवान्

- शल्य चिकित्सायां महर्षेः सुश्रुतस्य अवदानं वर्णयितुं समर्थः भविष्यति;
- सुश्रुतसंहितायाम् उल्लिखितानां शल्ययन्त्राणां वैविध्यं वर्णयितुं शक्तः भविष्यति;
- श्रेष्ठशल्यचिकित्सकस्य लक्षणानि लेखिष्यति;
- विविधशल्यविधाः वर्णयिष्यति;
- 'तव्यत्; अनीयर्' प्रत्यययुक्तपदानि वाक्ये प्रयोक्ष्यति;
- संधियुक्तपदानां सन्धिच्छेदं कृत्वा सन्धिनामानि लेखिष्यति;
- मु×च्, इष्, विश्, प्रच्छ् धातूनां वाक्येषु प्रयोगं करिष्यति।

## क्रियाकलापः



21.1



21.2



21.3



21.4

रुग्णानां जनानां रोगनिवारणार्थं प्रधानतः द्वे विधी। केषाञ्चित् रोगाणां कृते चूर्ण गोलिका–आदीनि दीयन्ते तथा केषाञ्चित् कृते शल्यचिकित्सा क्रियते। अधोलिखितेषु केषु रोगेषु चूर्णगोलिकादिभिः औषधचिकित्सा भवति केषु च शल्यचिकित्सा, इति विचार्य प्रत्येकम् सम्मुखम् 'औषधचिकित्सा' 'शल्यचिकित्सा' च इति लिखत।

| | |
|---|---|
| अजीर्णम् | ................................... |
| अस्थिभङ्गः | ................................... |
| ज्वरः | ................................... |
| वक्रनासिकाशोधनम् | ................................... |
| विषाक्तः व्रणः | ................................... |
| उच्चरक्तचापम् | ................................... |
| शिरः पालित्यम् | ................................... |
| कृत्त–अङ्गुलियोजनम् | ................................... |
| गृध्रसीवातः | ................................... |

तृतीये पाठे भवद्भिः महर्षिचरकविषये पठितं ज्ञातं च यत् स महान् वैद्यः आसीत्। चरकतुल्य एव महान् शल्यचिकित्सकः सुश्रुतः अपि आसीत्। तस्य विषये अत्र वयं पठामः।

## 21.1 मूलपाठः

### शल्यचिकित्साजनकः सुश्रुतः

इदानीं मूलपाठं पठामः।

चिकित्साविज्ञाने विभागद्वयं वर्तते– औषधचिकित्सा शल्यचिकित्सा च। आयुर्वेदस्य प्राचीनतमौ ग्रन्थौ चरक–संहिता सुश्रुतसंहिता च। चरकसंहिता नाम औषधचिकित्साग्रन्थः चरकेण तथा सुश्रुतसंहितानामकः ग्रन्थः च महर्षिणा सुश्रुतेन रचितः इति मन्यते। सुश्रुतस्य नामोल्लेखः वाल्मीकिरामायणे अपि अस्ति। सः विश्वामित्रस्य पुत्रः आसीत्। शल्यचिकित्सायां यन्त्रशस्त्रक्षार–अग्नि–प्रणिधानानि इति चत्वारि शल्यविधानानि वर्णितानि। किं नाम शल्यम्? शल्यवत् तुदति तत् शल्यम्। तस्य निरसनं शल्यकर्म।



21.5

उत्तमः शल्यचिकित्सकः कीदृशः भवेत् इति विषये वर्णयति सुश्रुतः–

शौर्यम् आशुक्रिया शस्त्रतैक्ष्ण्यम् अस्वेदवेपथुः।
असम्मोहश्च वैद्यस्य शस्त्रकर्मणि शस्यते।।

सुश्रुतोक्तानां शस्त्रकर्मणि उपयुज्यमानानां यन्त्राणां संख्या शताधिका अस्ति। वस्तुतः शस्त्रकर्मणि वैद्यस्य हस्त एव प्रधानतमः। सर्वाणि अपि यन्त्रकर्माणि तदधीनानि। शस्त्राणि षट्प्रकाराणि तद्यथा स्वास्तिकयन्त्राणि सन्दंशयन्त्राणि, तालयन्त्राणि नाडीयन्त्राणि, शलाकायन्त्राणि उपयन्त्राणि चेति।

**शब्दार्थः**

प्रणिधानानि = प्रयोग
शल्यम् = काँटा, ऑपरेशन
यन्त्रं = उपकरण, औजार
क्षार = क्षार, रस
शल्यविधानं = शल्यचिकित्सा के नियम, विधियाँ
तुदति = चुभता है, गड़ता है
निरसनम् = हटाना, निकालना
आशुक्रिया = क्षिप्र क्रिया, फूर्ति
तैक्ष्ण्यम् = तीखापन, शास्त्र का तेज, धारदार होना
अस्वेदवेपथुः = पसीना और कंपन न होना
असम्मोहः = मूर्च्छायाः अभावः स्थिरता, शांत और स्थिर रहने का भाव
शस्यते = प्रशंसा क्रियते, प्रशंसा की जाती है, सराहा जाता है
उपयुज्यमानानाम् = प्रयुक्तानाम्, जिनका प्रयोग किया जा रहा हो।
शताधिकाः = शतः अधिका एक सौ से अधिक
प्रधानतमः = मुख्यतमः (प्रमुख हैं)
यन्त्रकर्माणि = उपकरणों का उपयोग
स्वास्तिक यन्त्राणि = स्वास्तिक की भाँति बीच से जुड़े यंत्र जमूरा (cross shaped higes)
सन्दंशः = चिमटी, संडासी (forceps)
तालयन्त्रम् = चम्मच की आकृति का यंत्र (scoops)
नाड्यः = नली के समान भीतर से पोले उपकरण (tubules)
शलाकायन्त्राणि = छड़ीनुमा यन्त्र (rod type instruments)
मृगपक्षिणाम् = पशूनां पक्षिणां च, पशु–पक्षियों का
शल्यज्ञः = शल्यचिकित्सा जानने वाला, सर्जन
रुग्णस्य = रोगिजनस्य, रोगी का
सीवनार्थम् = सीने के लिए, जोड़ने के लिए, सूच्यः = सुइयाँ

तत्र चतुर्विंशतिः स्वस्तिकयन्त्राणि, द्वे सन्दंशे, द्वे तालयन्त्रे, विंशतिः नाड्यः अष्टाविंशतिः शलाकाः पञ्चविंशतिः उपयन्त्राणि च सन्ति। एतेषां कानिचित् यन्त्राणां मुखानि नानाप्रकाराणां मृगपक्षिणां मुखैः सदृशानि प्रायः भवन्ति। यथा प्राणिमुखानि वस्तु गृह्णन्ति तथैव दृढ़तया एतैः अपि शल्यज्ञः रुग्णस्य शरीरस्य अङ्गं गृहीतुं शक्नोति।

शस्त्रप्रणिधाने विंशतिविधानि शस्त्राणि सुश्रुतेन वर्णितानि। सीवनार्थं विविधाः सूच्यः अपि अत्र वर्णिताः।

शस्त्राणाम् आचारणविधिः पायनक्रमः ग्रहणपद्धतिः, उपदेशनियमावलिः शस्त्रसम्पत्, वर्जनीयाः दोषाः इत्यादयः अपि तत्र विस्तरेण वर्णिताः। क्षारेण चिकित्सा क्षारकर्मणि उल्लिखिता, अग्निकर्माणि अग्निदाहेन चिकित्सा प्रदर्शिता, सुश्रुतस्य अद्यतनख्यातिः नासाप्रतिष्ठापने अस्ति। एतदर्थं तेन सुनम्यशस्त्र–चिकित्सा आविष्कृता तदेव अद्य 'प्लास्टिक सर्जरी' इति कथ्यते। आधुनिकसुनम्यशस्त्र– चिकित्साजनकः सुश्रुतः एव इति पाश्चात्यैः अपि अङ्गीकृतम् अस्ति।

नूनम् आरोग्यप्रदानं महापुण्यदायकम्। अतएव उक्तं स्कन्दपुराणे–

आरोग्यशालां यः कुर्यात् महावैद्यपुरस्कृताम्।
सर्वोपकरणोपेतां तस्य पुण्यफलं श्रृणु।।
धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः।
तस्मादारोग्यदानेन तद्दत्तं स्याच्चतुष्टयम्।
अथैकमात्रं विद्वांसं स्वस्थीकृत्य प्रयत्नतः।
प्राप्नोति सुमहत्पुण्यमनन्तं क्षयवर्जितम्।।

वस्तुतः संस्कृते बहुमूल्यज्ञानं निहितम् अस्ति। मानवः जन्मतः त्रिभिः ऋणैः सह जायते। तेषु एकम् ऋषि–ऋणम्। अस्माकं पूर्वजाः ऋषयः महता कष्टेन ज्ञानं सम्पादितवन्तः। यदि वयं स्वाध्यायं कुर्मः तर्हि न केवलम् ऋषि–ऋणम् अपितु समाज–ऋणम् अपि अपाकृतं भवति एवं ज्ञानरथः च अग्रे सरति इति नास्तिः सन्देहः।

**शब्दार्थः**

आचरणिविधिः = प्रयोग करने की विधि
पायनक्रमः = उपयोग करने का क्रम
ग्रहण पद्धतिः = उपकरण को पकड़ने का तरीका
नासाप्रतिष्ठापने = कटी हुट नाक को अपने स्थान पर बिठाना
उपदेश नियमावलिः = उपदेश के नियम
शस्त्रसम्पत् = उपकरणों का भंडार
वर्जनीय = न करने वाले, जिसकी मनाही हो, वर्जित
विस्तरेण = विस्तार से
क्षारेण = क्षार से, रस, अम्ल से
अग्नि दाह = आग से दागना
अद्यतन = आधुनिक
सुनम्य शल्यचिकित्सा = प्लास्टिक सर्जरी
पाश्चात्यैः = पश्चिम (यूरोप अमेरिका) के निवासियों द्वारा
अंगीकृतम् = स्वीकार कर लिया है
आरोग्यशाला = चिकित्सालय, नर्सिंग होम
महावैद्यः = प्रमुख चिकित्सक
चतुष्टयम् = पुरुषार्थचतुष्टयम् धर्म, अर्थ, काम और मोक्ष
दत्तं स्यात् = दिए हुए के समान हैं
क्षयवर्जितम् = जिसका क्षय न हो, अक्षय
त्रिभिः ऋणैः = तीन ऋणों से, देवऋण, पितृऋण और ऋषि–ऋण से
अपाकृतम् = दूरीकृतम्, मुक्त
ज्ञानरथः = ज्ञान का रथ
सरति = आगे चलता है।

## 21.2 बोधप्रश्नाः

भवद्भिः मूलपाठः पठितः। अधुना अधोलिखितानां प्रश्नानाम् उत्तराणि दत्त

1. समुचितम् उत्तरं चिह्नीकुरुत

   सुश्रुतः कः आसीत्?

   (क) वैद्यराजः

   (ख) शल्यचिकित्सकः

   (ग) शल्यकारः

2. पाठं पठित्वा रिक्तस्थानानि पूरयत

   (क) चिकित्साविज्ञाने विभागद्वयं वर्तते– (i) ........... (ii) ...........

   (ख) शल्यचिकित्सायां चत्वारि शल्यविधानानि वर्णितानि यन्त्र ................................ क्षार ................ इति।

   (ग) शस्त्रकर्मणि उपयुज्यमानानां यन्त्राणां संख्या ....................... अस्ति।

   (घ) सीवनार्थं विविधाः ............................ अपि तेन वर्णिताः।

   (ङ) एतदर्थं तेन ......................... आविष्कृता तदेव अद्य प्लास्टिकसर्जरी इति कथ्यते।

   (च) यदि वयं ........................ कुर्मः तर्हि न केवलम् ऋषि–ऋणम् अपितु ................ अपि अपाकृतं भवति।

3. पद्यांशान् मेलयत

| | |
|---|---|
| (i) असम्मोहश्च | (क) स्वस्थीकृत्य प्रयत्नतः |
| (ii) आरोग्यशालां यः कुर्यात् | (ख) तस्य पुण्यफलं श्रृणु |
| (iii) तस्मादारोग्यदानेन | (ग) आरोग्यं साधनं यतः |
| (iv) अथैकमात्रं विद्वांसम् | (घ) शस्त्रकर्मणि शस्यते |
| (v) प्राप्नोति सुमहत्पुण्यम् | (ङ) तैक्ष्यण्यम् अस्वेदवेपथुः |
| (vi) सर्वोपकरणोपेतां | (च) महावैद्यपुरस्कृताम् |
| (vii) धर्मार्थकाममोक्षाणां | (छ) अनन्तं क्षयवर्जितम् |
| (viii) शौर्यम आशुक्रियाशस्त्र | (ज) तद्दत्तं स्यात् चतुष्टयम् |





## 21.3 अधुना अवगच्छामः

### प्रथमः अंशः

**चिकित्साविज्ञाने ................................................. गृहीतुं शक्नोति।**

सम्प्रति प्रथमम् अंशं पुनः पठामः अवगच्छामः च।

**व्याख्या–**

सर्वप्रथमं लेखकः चिकित्साविज्ञानस्य विभागद्वयं कथयति। तत्र प्रथमः 'औषधचिकित्सा' अस्ति यत्र केवलं चूर्णगोलिकाः रसादिभिः चिकित्सा क्रियते। द्वितीयः तावत् 'शल्यचिकित्सा' वर्तते यत्र शल्यक्रिया माध्यमेन रुग्णस्य छिन्नम् अङ्गं विदार्य रोगस्य कारकम् अपाकृत्य व्रणः पुनः सीव्यते।

आयुर्वेदस्य द्वौ प्राचीनतमौ गन्थौ– 1. चरकसंहिता (औषधचिकित्साग्रन्थः)– चरकेण प्रणीतः। 2. सुश्रुतसंहिता (शल्यचिकित्साग्रन्थः)– महर्षिसुश्रुतेन लिखितः।

**सुश्रुतः**– रामायणे सुश्रुतस्य उल्लेखः विद्यते। एतत् सूचयति यत् सुश्रुतस्य जीवनकालः वाल्मीकेः अपि पूर्वम् आसीत्। एवम् इतः सार्द्ध–द्विसहस्राब्दिपूर्वं सुश्रुतस्य नाम सुप्रसिद्धम् आसीत्। सुश्रुतः विश्वामित्रस्य पुत्रः आसीत् इति कथ्यते, परं तस्य विषये वयम् अधिकं न जानीमः। तस्य महत्कर्मभिः तस्य यशः अद्यापि जीवति।

**शल्यकर्म**– तस्य कर्म शल्यक्रियाभिः रोगाणाम् अपनयनम्। 'शल्यकर्म' इति पदं 'शल्य' शब्दात् व्युत्पन्नम् 'शल्यम्' इति नाम तीक्ष्णकण्टकः यत् शल्यवत् तुदति, पीडयति तदपि शल्यम्। तस्य शल्यस्य निष्कासनम् एव शल्यचिकित्सा।

**शल्यविधानानि**– शल्यचिकित्सायां चत्वारि शल्यविधानानि कथितानि। तानि सन्ति– 1. यन्त्रप्रणिधानम् (यन्त्राणां प्रयोगः) 2. शस्त्रप्रणिधानम् 3. क्षारप्रणिधानम् 4. अग्निप्रणिधानम्। सुश्रुतस्य मतेन **आदर्शः शल्यचिकित्सकः** एवंविधः भवति। 1. सः शूरः भवति। 2. सः आशुक्रियः भवति, अर्थात् कार्याणि शीघ्रं क्षिप्रगतिना सम्पादयति। 3. तस्य शस्त्राणि–यन्त्राणि वा तीक्ष्णानि भवन्ति। 4. शल्यकर्मनिष्पादने सः सवेपथुः न भवेत्, भयेन स्वेदं च न मुञ्चतु। 5. मनसा स्थिरः भवेत् तस्य असम्मोहः अपि भवेत्।

अधुना पाठे प्रथमं श्लोकं पुनः सावधानतया पठामः

**पदच्छेदः**– शौर्यम् आशुक्रिया शस्त्रतैक्ष्ण्यम् अस्वेदवेपथुः।
असम्मोहः च वैद्यस्य शस्त्रकर्मणि शस्यते।।

शौर्यम् आशुक्रिया
शस्त्रतैक्ष्ण्यम् अस्वेदवेपथुः।
असम्मोहश्च वैद्यस्य
शस्त्रकर्मणि शस्यते।।

**अन्वयः**– शस्त्रकर्मणि वैद्यस्य शौर्यम्, आशुक्रिया, शस्त्रतैक्ष्ण्यम्, अस्वेदवेपथुः असम्मोहः च शस्यते।

**व्याख्या**– शस्त्रकर्म (शल्यकर्म) कुर्वतः चिकित्सकस्य अधोलिखितानि लक्षणानि प्रशंसनीयानि

| | |
|---|---|
| 1. शौर्यम् | (साहसम्) |
| 2. आशुक्रिया | (शीघ्रता तथा कार्य–सम्पादनम्) |
| 3. शस्त्रतैक्ष्ण्यम् | (उपकरणानां तीक्ष्णता) |
| 4. अस्वेदवेपथुः | (शल्यक्रियां सम्पाद्यया सः अस्वेदः अवेपथुश्च भवेत्) |
| 5. असम्मोहः | (मनसः स्थैर्यम्) |

सुश्रुतेन शल्यचिकित्सार्थे शताधिकानि यन्त्राणि निर्धारितानि। परं तेषु हस्तः एव प्रधानतमः। हस्तेन एव शल्यकर्म क्रियते। हस्तस्य कुशलतां विना यन्त्राणाम् न कोऽपि लाभः। अतः सर्वाणि यन्त्राणि, हस्तस्य अधीनानि एव। एवं **हस्तः प्रधानतमं यन्त्रम्।**

शताधिकानानि शल्ययन्त्राणि षड्विधानि, तद् यथा–

| यन्त्राणां प्रकारः | | संख्या |
|---|---|---|
| 1. स्वास्तिकयन्त्राणि | – | 24 |
| 2. सन्दंशयन्त्राणि | – | 02 |
| 3. तालयन्त्राणि | – | 02 |
| 4. नाडीयन्त्राणि | – | 20 |
| 5. शलाकायन्त्राणि | – | 28 |
| 6. उपयन्त्राणि | – | 25 |

स्वास्तिकयन्त्राणि चतुर्विंशतिविधानि कथितानि। तेषु अनेकेषां यन्त्राणां मुखाकृतिः केषाञ्चित् पशूनां पक्षिणां वा मुखाकृतिसदृशा भवति। तेनैव कारणेन तेषां तानि–तानि नामानि दीयन्ते।

यथा पशवः मुखेन पक्षिणः च चञ्च्वा वस्तूनि दृढं गृह्णन्ति तथैव एतानि यन्त्राणि अपि रोगिजनस्य अङ्गानि दृढं गृह्णन्ति येन शल्यकर्मसम्पादनं सम्यक् भवेत्।


### स्वास्तिकयन्त्राणि (पशुमुखाकृतिसदृशानि)

**यन्त्रनाम्**– 1. सिंहयन्त्रम्, 2. व्याघ्रयन्त्रम्, 3. वृकयन्त्रम्, 4. तरक्षुयन्त्रम्, 5. ऋक्षयन्त्रम्, 6. द्वीपीयन्त्रम्, 7. शृगालयन्त्रम्, 8. मृगयन्त्रम्

(व्याघ्र = बाघ, वृकः = भेड़िया, तरक्षुः = लकड़बग्घा, ऋक्षः = भालू, द्वीपी = चीता, शृगालः = सियार)




21.6



21.7




टिप्पणी



21.8


21.9



21.10


21.11



21.12


21.13



21.14


21.15



21.16


21.17


21.18


21.19



21.20


21.21

## स्वास्तिकयन्त्राणि (पक्षिचञ्चुसदृशानि)

**यन्त्रनाम्** 1. काकयन्त्रम्, 2. कङ्कयन्त्रम्, 3. कुररयन्त्रम्, 4. चाषयन्त्रम्, 5. श्येनयन्त्रम्, 6. शशघाटयन्त्रम्, 7. गृध्रयन्त्रम्, 8. क्रौञ्चयन्त्रम्, 9. अञ्जलिकर्णयन्त्रम्

(काकः = कौवा, कङ्कः = बगुला, कुररः = उकाब कुरी, चाषः = नीलकंठ, श्येनः = बाज, शशघाटः = चील, गृध्रः = गीध, क्रौ×चः = सारस, अञ्जलिकर्णः = उल्लू)




### सारः

चिकित्साविज्ञानस्य द्वे विभागे– औषधिचिकित्सा, शल्यचिकित्सा च। सुश्रुतः शल्यचिकित्सा जनकः कथ्यते। सः विश्वामित्रस्य पुत्रः आसीत्। तस्य ग्रन्थः 'सुश्रुतसंहिता' नाम। सुश्रुतस्य उल्लेखः महर्षिणा वाल्मीकिना स्वरामायणे कृतम्। एतत् प्रमाणं यत् सुश्रुतः वाल्मीकेः पूर्वम् आसीत्। सुश्रुतेन चत्वारि शल्यविधानानि उक्तानि–

● यंत्रप्रणिधानम् ● शस्त्रप्रणिधानम् ● क्षारप्रणिधानम् ● अग्निप्रणिधानम्। शल्यक्रियायां शताधिकानि यन्त्राणि–शस्त्राणि।

चिकित्साविज्ञान के दो विभाग हैं– औषधचिकित्सा तथा शल्यचिकित्सा। सुश्रुत शल्यक्रिया के जनक कहे जाते हैं। वे विश्वामित्र के पुत्र थे। उनके ग्रंथ का नाम है सुश्रुत–संहिता। सुश्रुत का उल्लेख महर्षि वाल्मीकि द्वारा अपनी रामायण में किया गया है। यह उसका

प्रमाण है कि सुश्रुत वाल्मीकि से पूर्व हुए थे। सुश्रुत द्वारा चार शल्य विधान कहे गये हैं–

● यंत्रप्रणिधान ● शस्त्रप्रणिधान ● क्षारप्रणिधान ● अग्निप्रणिधान।

शल्य क्रिया में सौ से अधिक शस्त्र कहे गए हैं।

## पाठगतप्रश्नाः 21.1

1. आयुर्वेदस्य प्राचीनतमग्रन्थयोः नाम लिखत।
   (क) ........................................
   (ख) ........................................
2. वाल्मीकिना रामायणे सुश्रुतस्य नामोल्लेखं कृतम्, अनेन किं सिद्ध्यति?
   ........................................ ........................................
3. शल्यकर्म किं कथ्यते? ........................................
4. अधोलिखितम् श्लोकं पूरयत
   शौर्यम् .................................. शस्त्रतैक्ष्ण्यम् ..................................,
   असम्मोहश्च .......................................... शस्त्रकर्मणि प्रशस्यते।
5. त्रयाणां स्वस्तिकयंत्राणां नामानि लिखत
   ........................................................................................................................................

---

## द्वितीयः अंशः

**शस्त्रप्रणिधानं ................................................................ नास्ति सन्देहः।**

अधुना वयं द्वितीयम् अंशम् अवगच्छामः।

अस्माभिः प्रथमे अंशे पठितम् यत् सश्रुतेन चतुर्विधानि शल्यविधानानि उल्लेखितानि–
● यंत्रप्रणिधानम् ● शस्त्रप्रणिधानम् ● क्षारप्रणिधानम् ● अग्निप्रणिधानम् च।

यन्त्रप्रणिधानविषये अपि भवद्भिः प्रथमे अंशे पठितम् अस्ति। अधुना शस्त्र–क्षार–अग्नि प्रणिधानविषये किंचित् जानीमः।

**व्याख्या–**

यैः उपकरणैः व्रणादीनां लेखनं, भेदनं, छेदनं सीवनं च क्रियते तानि शस्त्राणि कथितानि। सुश्रुतेन विशतिविधानि शस्त्राणि वर्णितानि। **शस्त्रप्रणिधाने** शस्त्राणाम् उपयोगविधिः, ग्रहणपद्धतिः, उपदेश–नियमाः, शस्त्रसम्पत्, वर्जनीयाः दोषाः च विस्तरेण वर्णिताः।

'**क्षारप्रणिधाने** क्षारेण चिकित्साविधिः वर्णिताः। **अग्निप्रणिधाने** च अग्निदाहने चिकित्सा–विधिः वर्णितः। सुश्रुतस्य महत्याः प्रतिष्ठायाः कारणं कृत्तनासिकायाः पुनः प्रतिष्ठापने तस्य निपुणता वर्तते। अनेन कारणेन स अद्यापि स्मर्यते।

एषः विधिः सुनम्यशल्यचिकित्सा नाम्ना उल्लिखिता। सः विधिः प्लास्टिक सर्जरी इति नाम्ना प्रख्याता।

रोगिजनानां हिताय अद्यापि सर्वकारेण परोपकारिभिः जनैः वा अरोग्यशालास्थापनं क्रियते। आरोग्यशाला कथंविधा स्यात्? तस्याः स्थापनेन पुण्यलाभः कथं भवेत्? अरोग्यप्रदानं कथं पुण्यकर्म इति कथ्यते? एतेषां प्रश्नानाम् उत्तराणि श्लोकत्रये दत्तानि। तद् यथा–

आरोग्यशलां यः कुर्यात्
महावैद्यपुरस्कृताम्।
सर्वोपकरणोपेतां तस्य
पुण्यफलं श्रृणु।।

**पदच्छेदः**– आरोग्यशालाम् यः कुर्यात् महावैद्यपुरस्कृताम्।
सर्वोपकरणोपेताम् तस्य पुण्यफलम् श्रृणु।।

**अन्वयः**– यः (जनः) महावैद्यपुरस्कृताम्, सर्वोपकरणोपेताम् आरोग्यशालाम् कुर्यात् तस्य पुण्यफलम् श्रृणु।

**व्याख्या**–

यत्र रोगिजनेभ्यः आरोग्यं दीयते सा आरोग्यशाला चिकित्सालयः इति कथ्यते।

आरोग्यशाला कथंभूता स्यात्

1. महावैद्यपुरस्कृता, कुशलचिकित्सकैः पूर्णा

2. सर्वोपकरणोपेता च यदि चिकित्सालये शल्यकर्मादीनां निष्पादनार्थं पर्याप्तानि उपकरणानि, भवेयुः तर्हि (रोगिजनानां चिकित्सा संभवा भवेत्।)

धर्मार्थकाममोक्षाणामारोग्यं
साधनं यतः।
तस्मादारोग्यदानेन
तद्दत्तं स्याच्चतुष्टयम्।

**पदच्छेदः**– धर्मार्थकाममोक्षाणाम् आरोग्यम् साधनम् यतः।
तस्मात् आरोग्यदानेन तत् दत्तम् स्यात् चतुष्टयम्।।

**अन्वयः**– यतः धर्म–अर्थ–काम–मोक्षाणाम् साधनम् आरोग्यम्। तस्मात् आरोग्यदानेन तत् चतुष्टयम् (धर्म–अर्थ–काम–मोक्षम् इति) दत्तम् स्यात्।

**व्याख्या**–

'चतुष्टयम्' इति पदेन पुरुषार्थचतुष्टयम् इति कथितम्। धर्मपालनम्, अर्थ सञ्चयम्, इच्छापूर्तिः, मोक्षाय प्रयत्नम् इति चत्वारि कर्माणि पुरुषार्थचतुष्टयस्य विषयाणि।

आरोग्यप्रदानं पुरुषार्थचतुष्टयस्य साधनं भवतिं यदि जनः रुग्णः भवति तदा सः धर्माचरणे अर्थसञ्चये, कामसेवने, मोक्षसाधने वा सर्वथा असमर्थः भवति। उक्तं हि– "शरीरमाद्यं खलु धर्मसाधनम्।" रुग्णेन शरीरेण न किञ्चित् क्रियते। अतः आरोग्यप्रदानं पुरुषार्थ चतुष्टयस्य साधनम् इति कथितम्–

अथैकमात्र विद्वांसं
स्वस्थीकृत्य प्रयत्नतः।
प्राप्नोति सुमहत्पुण्यमनन्तं
क्षयवर्जितम्।।

**पदच्छेदः**– अथ एकमात्रम् विद्वांसम् स्वस्थीकृत्य प्रयत्नतः।
प्राप्नोति सुमहत् पुण्यम् अनन्तम् क्षयवर्जितम्।।

**अन्वयः**– अथ एकमात्रम् विद्वांसम् प्रयत्नतः स्वस्थीकृत्य (जनः) अनन्तम् क्षयवर्जितम् सुमहत् पुण्यम् प्राप्नोति।

**व्याख्या–**

एकमात्रं जनं प्रयत्नपूर्वकं यः स्वस्थीकरोति, स्वास्थ्यं प्रयच्छति सः महत्पुण्यं प्राप्नोति तत् पुण्यम् अनन्तं सीमारहितं, क्षयवर्जितं च तत् न कदापि क्षीयते।

एवं स्पष्टं यत् अस्माकं समाजे चिकित्सकस्य महती प्रतिष्ठा। स्वास्थ्यलाभाय यः आरोग्यशालानिर्माणं करोति, तत्र कुशलान् वैद्यान् स्थापयति, उपयोगीयन्त्राणाम् उपकरणानां च व्यवस्थां करोति सः महत् पुण्यं प्राप्नोति।

मानवजीवने 'पुरुषार्थचतुष्टयम्' विद्वद्भिः कथितम्। अधोलिखिताः सन्ति पुरुषार्थाः

(i) धर्माचरणम् (ii) अर्थसङ्ग्रहः (iii) कामनापूर्तिः (iv) मोक्ष–प्राप्तये प्रयत्नः

यदि कोऽपि जनः अस्वस्थः भवति तर्हि सः पुरुषार्थसाधने अपि असमर्थः भवति, यः जनेभ्यः आरोग्यं ददाति सः वस्तुतः तान्–तान् जनान् पुरुषार्थसाधनाय सक्षमान् करोति। अनेन कर्मणा सः अक्षयं पुण्यं प्राप्नोति।

''मानवः जन्मतः'' त्रिभिः ऋणैः सह जायते। एतानि त्रीणि ऋणानि सन्ति–

1. देवऋणम्
2. ऋषिऋणम्
3. पितृऋणम्

संस्कृते निहितं बहुमूल्यं ज्ञानं प्राप्य तस्य प्रचारेण प्रसारेण च वयं ऋषि–ऋणेन मुक्ताः भवामः। ऋणत्रयात् मुक्तिः समाज–ऋणम् अपि अपाकरोति।

**सारः**

सुश्रुतेन शल्यक्रियार्थे न केवलं यन्त्राणाम् अपितु शस्त्राणां, सूच्यादीनां च उल्लेखं कृतम्। तेषां उपयोगविधिः च वर्णितः। सुश्रुतस्य प्रसिद्धेः आधारः सुनम्यशल्यचिकित्सा अस्ति। सः कृत्तां नासिकां पुनः स्थापने निपुणः आसीत्। एवं स अद्यतनप्लास्टिकसर्जरी नाम विधेः जनकः कथ्यते। आरोग्यप्रदानं महापुण्यदायकम् अस्ति। आरोग्यशालास्थापना पुण्यदायकम् कर्म। आरोग्यदानेन पुरुषार्थचतुष्टयम् एव दत्तं भवेत्।

## व्याकरणबिन्दवः

**(i) सन्धिः**– अधोलिखितेषु पदेषु सन्धिच्छेदं कुरुत संधिनाम च लिखत

| | | | | |
|---|---|---|---|---|
| शताधिकाः | = | शत | + .................. | = दीर्घस्वरसन्धिः |
| असम्मोहश्च | = | .................. | + च | = विसर्गसन्धिः |
| सुश्रुतोक्तानाम् | = | .................. | + ...................... | = गुणसन्धिः |
| सर्वोपकरणोपेताम् | = | सर्व + ............ | + .................. | = .................. |
| सीवनार्थम् | = | ....................... | + ................... | = .................. |




| | | | | | | |
|---|---|---|---|---|---|---|
| तदधीनाति | = | ...................... | + | .................. | = | व्यंजनसंधिः |
| तद्दत्तम् | = | ...................... | + | दत्तम् | = | ...................... |

**(ii) समासाः**— समस्तपदउल्लेखः, समासविग्रहः समासनामोल्लेखः वा यथानिर्दिष्टं क्रियताम्

| | | | | |
|---|---|---|---|---|
| यथा—मृगपक्षीणाम् | = | मृगाणां च पक्षीणां च | = | द्वन्द्वः |
| ...................... | = | प्राणिनां मुखानि | = | तत्पुरुषः |
| चिकित्साजनकः | = | ......................... | = | तत्पुरुषः |
| ..................... | = | आरोग्यस्य | = | ..................... |
| अग्निदाहम् | = | अग्निना दाहम् | = | ..................... |
| .................... | = | महान् च असौ वैद्यः | = | ..................... |
| धर्मार्थकाममोक्षाणाम् | = | ........................तेषाम् | = | द्वन्द्वः |
| महत्पुण्यम् | = | ....................... | = | कर्मधारयः |
| ज्ञानार्थः | = | ज्ञानाय अयम् | = | ..................... |

**(iii) प्रत्ययाः**— जानन्ति एव भवन्तः यत् प्रत्ययानां संयोगेन नूतनानि पदानि निर्मीयन्ते। यथा— धातोः— गत्वा, गतवती, गच्छत्, गम्यः, गन्तव्यः ........... इत्यादयः। अधुना वयं जानीमः तव्यत् अनीयर् च प्रत्ययौ—

| धातुः + प्रत्ययः | पदम् | प्रयोगः |
|---|---|---|
| गम् + तव्यत् | गन्तव्यम् | त्वया गृहं गन्तव्यम्। |
| गम् + अनीयर् | गमनीयम् | त्वया कुत्र गमनीयम्? |
| कृ + तव्यत् | कर्त्तव्यम् | अस्माभिः देशसेवा कर्त्तव्या। |
| कृ + अनीयर् | करणीयम् | एतत् कार्यं शीघ्र करणीयम्। |
| दा + अनीयर् | दानीयम् | भिक्षुकाय दानीयम्। |
| हन् + तव्यत् | हन्तव्यम् | न कोऽपि जनः हन्तव्यः। |
| लिख् + अनीयर् | लेखनीयम् | मया एका कविता लेखनीया। |

अस्मिन पाठे 'तुद्' धातोः प्रयोगः प्राप्यते। अतः केषाञ्चित् तुदादिगणीयधातूनां रूपाणि अत्र दीयन्ते।

### 'मुच्' धातुः 'उभयपदी' परस्मैपदे

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्र० पु०** | मुञ्चति | मुञ्चतः | मुञ्चन्ति | मोक्ष्यति | मोक्ष्यतः | मोक्ष्यन्ति |
| **म० पु०** | मुञ्चसि | मुञ्चथः | मुञ्चथ | मोक्ष्यसि | मोक्ष्यथः | मोक्ष्यथ |
| **उ० पु०** | मुञ्चामि | मुञ्चावः | मुञ्चामः | मोक्ष्यामि | मोक्ष्यावः | मोक्ष्यामः |





| | लङ्लकारः | | | लोट्लकारः | | |
|---|---|---|---|---|---|---|
| **प्र० पु०** | अमुञ्चत् | अमुञ्चताम् | अमुञ्चन् | मुञ्चतु | मुञ्चताम् | मुञ्चन्तु |
| **म० पु०** | अमुञ्चः | अमुञ्चतम् | अमुञ्चत | मुञ्च | मुञ्चतम् | मुञ्चत |
| **उ० पु०** | अमुञ्चम् | अमुञ्चाव | अमुञ्चाम | मुञ्चानि | मुञ्चाव | मुञ्चाम |

**विधिलिङ्**

| | **एकवचनम्** | **द्विवनचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्र० पु०** | मुञ्चेत् | मुञ्चेताम् | मुञ्चेयुः |
| **म० पु०** | मुञ्चेः | मुञ्चेतम् | मुञ्चेत |
| **उ० पु०** | मुञ्चेयम् | मुञ्चेव | मुञ्चेम |

## इष् धातुः परस्मैपदी

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्र० पु०** | इच्छति | इच्छतः | इच्छन्ति | एषिष्यति | एषिष्यतः | एषिष्यन्ति |
| **म० पु०** | इच्छसि | इच्छथः | इच्छथ | एषिष्यसि | एषिष्यथः | एषिष्यथ |
| **उ० पु०** | इच्छामि | इच्छावः | इच्छामः | एषिष्यामि | एषिष्यावः | एषिष्यामः |

| | लङ्लकारः | | | लोट्लकारः | | |
|---|---|---|---|---|---|---|
| **प्र० पु०** | ऐच्छत् | ऐच्छताम् | ऐच्छन् | इच्छतु | इच्छताम् | इच्छन्तु |
| **म० पु०** | ऐच्छः | ऐच्छतम् | ऐच्छत | इच्छ | इच्छतम् | इच्छत |
| **उ० पु०** | ऐच्छम् | ऐच्छाव | ऐच्छाम | इच्छानि | इच्छाव | इच्छाम |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| **प्र० पु०** | इच्छेत् | इच्छेताम् | इच्छेयुः |
| **म० पु०** | इच्छेः | इच्छेतम् | इच्छेत |
| **उ० पु०** | इच्छेयम् | इच्छेव | इच्छेम |

निर्देशः प्रच्छ् धातोः रूपाणि इष् धातु वत् भवन्ति। अतः प्रच्छ् धातोः अपि परस्मैपदे पंचलकारेषु रूपाणि स्वयं लिखत।

## पाठगतप्रश्नाः 21.2

1. शल्यचिकित्सकैः व्रणसीवनार्थं किं प्रयुज्यते?
2. सुश्रुतस्य अद्यतनख्यातिः केन कारणेन अस्ति?
3. पुरुषार्थचतुष्टयं किम्?
4. आरोग्यशाला कथंविधा कारयेत्?
5. ऋणत्रयाणां नामानि लिखत।
6. केन प्रदत्तेन पुरुषार्थचतुष्टयम् एव दत्तं भवेत्?
7. स्वास्थ्यप्रदानं क्षयवर्जितं कर्म कथं स्यात्?

## 21.4 किम् अधिगतम्

- चिकित्साविज्ञानस्य द्वे विभागे – (i) औषधचिकित्सा (ii) शल्यचिकित्सा स्तः
- सुश्रुतः प्राचीनतमः शल्यचिकित्सकः, तस्य ग्रंथः– 'सुश्रुतसंहिता'।
- शल्यचिकित्सायां यन्त्रशस्त्रक्षार–अग्निप्रणिधानानि इति चत्वारि शल्यविधानानि वर्णितानि।
- शल्यचिकित्सकस्य लक्षणानि–

  (i) शूरः भवति। (ii) कार्याणि शीघ्रं सम्पादयति। (iii) तस्य शस्त्राणि तीक्ष्णानि भवन्ति (iv) शल्यकर्मनिष्पादने तस्य हस्तौ अकम्पमानौ भवतः। (v) मनसा स्थिरः भवति।
- शल्यकर्माणि शताधिकानि यन्त्राणि प्रयुज्यते, यथा
  - स्वस्तिकाकृतियन्त्राणि – 24
  - सन्दंशयन्त्राणि – 2
  - तालयन्त्राणि – 2
  - नाडीयन्त्राणि – 20
  - उपयन्त्राणि – 25
- सुश्रुतस्य ख्यातिः नासाप्रतिष्ठापने अस्ति। सुनम्यशस्त्रचिकित्सा एव 'प्लास्टिक–सर्जरी' इति कथ्यते। अत एव सुश्रुतः प्लास्टिक–सर्जरी विज्ञानस्य अपि जनकः।
- आरोग्यदानं पुण्यकार्यम् भवति।

## 21.5 योग्यताविस्तारः

भारतवर्षे आयुर्वेदस्य परंपरा अति प्राचीना विद्यते। सुश्रुतः गाधिपुत्रस्य विश्वामित्रस्य पुत्रः दिवोदास–धन्वन्तरेः शिष्यः आसीत्। तस्य प्रणीतं ग्रन्थं 'सुश्रुतसंहिता'' इति कथ्यते। नागार्जुनेन वाग्भटेन च अस्य ग्रन्थस्य संपादनं कृतम्–इति अपि मन्यन्ते विद्वांसः।

प्रचीनानां केषांचित् आयुर्वेदाचार्याणाम् नामानि स्मरत

इन्द्रः, धन्वन्तरिः, चरकः, सुश्रुतः, भास्करः, धवनः, भृगुः, नागार्जुनः, वाग्भटः, हारीतः, जतूकर्णः इत्यादयः।

## 21.6 पाठान्तप्रश्नाः

1. एकवाक्येन उत्तरत

   (क) शस्त्रप्रणिधाने कतिविधानि शस्त्राणि सुश्रुतेन वर्णितानि?

(ख) शल्यकर्म किं?

(ग) शस्त्रकर्मणि प्रधानतमः कः?

(घ) सुश्रुतस्य अद्यतनख्यातिः कस्मिन् कर्मणि वर्तते?

(ङ) आधुनिकसुनम्यशस्त्रचिकित्साजनकः कः कथ्यते?

2. आरोग्यशाला कीदृशी भवेत्?
3. आरोगयशालानिर्माणस्य पुण्यं फलं किं भवति?
4. आरोग्यप्रदानेन पुरुषार्थचतुष्टयं कथं सम्पाद्यते?
5. शस्त्रकर्मचिकित्सकस्य प्रशस्तानि लक्षणानि कानि सन्ति?
6. पशुमुखाकृतिसदृशानां पक्षिचञ्चुसदृशानां च स्वस्तिकयन्त्राणां नामानि लिखत।
7. सुश्रुतेन आरब्धानां शल्यचिकित्सायां कीदृशी प्रगतिः कृता? स्वनिर्मितपञ्चवाक्येषु वर्णयत।
8. अधोलिखितानां तव्यत्प्रत्ययान्तपदानाम् अनीयर्प्रत्ययान्तपदानां च स्ववाक्येषु प्रयोगं कुरुत

   (i) स्मर्तव्यम् (ii) गन्तव्यम् (iii) हन्तव्यः (iv) करणीयम् (v) लेखनीया
9. स्वपाठात् चित्वा दशक्तप्रत्ययान्तपदानि लिखत।
10. सन्धिच्छेदं कृत्वा सन्धिनामानि लिखत

    (i) नामोल्लेखः (ii) असम्मोहश्च, (iii) तदधीनानि (iv) उल्लिखिताः (v) आविष्कृता (vi) अतएव (vii) पुरस्कृतम्
11. यथानिर्देशम् उपयुक्तैः धातुरूपैः रिक्तस्थानानि पूरयत

    (i) आखेटकः मृगेषु शरान् ...................... । (मुच्–लङ्लकारः)

    (ii) एताः कथम् अश्रूणि ...................... । (मुच्–लट्लकारः)

    (iii) अहं आमूलात् कथां श्रोतुम् ...................... । (इष्–लट्लकारः)

    (iv) सः योगमयं जीवनम् ...................... । (इष्–लङ्लकारः)

    (v) भवान् एकं प्रश्नं ...................... । (प्रच्छ्–लोट्लकारः)

    (vi) वयम् किञ्चित् अपि न ...................... । (प्रच्छ्–लृट्लकारः)

    (vii) कश्चित् जटिलः तपस्वी तपोवनम् ...................... । (विश्–लङ्लकारः)

    (viii) सर्वे जनाः स्वैरं तपोवनं ...................... । (विश्–विधिलिङ् लकारः)

## 21.7 उत्तराणि

### 21.3 बोधप्रश्नाः

1. (i) ख (ii) ग (iii) ख
2. सुश्रुतः
3. वाल्मीकेः

**पाठगतप्रश्नाः**

**21.1** 1. चरकसंहिता, सुश्रुत संहिता।

2. सुश्रुतः वाल्मीकेः पूर्वम् आसीत्।

3. यत् शल्यवत् तुदति तस्य निष्कासनम्।

4. शूरः, आशुक्रियः, तीक्ष्णशस्त्रयुक्तः अस्वेदवेपथुः असम्मोहश्च।

5. सिंहयन्त्रम्, व्याघ्रयन्त्रम्, काकयन्त्रम्, क्रौ×च यन्त्रम् इत्यादयः

**21.2** 1. सूच्यः

2. नासाप्रतिष्ठापनेन

3. धर्म–अर्थ–काम–मोक्षम्

4. महावैद्य पुरस्कृता, सर्वोपकरणोपेता च

5. देव–ऋणम्, ऋषि–ऋणम्, पितृ–ऋणम्

6. आरोग्यदानेन

7. स्वास्थ्यप्रदानेन मानवानां हितं भवति। अस्य पुण्यस्य क्षयं न भवति।

**21.6 पाठान्तप्रश्नाः**

1. (क) शस्त्रप्रणिधाने विंशतिविधानि शस्त्राणि सुश्रुतेन वर्णितानि।

(ख) शल्यस्य निरसनं शल्यकर्म कथ्यते।

(ग) शस्त्रकर्मणि चिकित्सकस्य हस्तः एव प्रधानतमः।

(घ) सुश्रुतस्य अद्यतनख्यातिः नासाप्रतिष्ठापने अस्ति।

(ङ) सुश्रुतः आधुनिकसुनम्यशस्त्रचिकित्साजनकः कथ्यते।

2. आरोग्यशाला महावैद्यपुरस्कृता सर्वोपकरणोपेता च भवेत्।

3. आरोग्यशालानिर्माणस्य पुण्यं फलं पुरुषार्थचतुष्टयसम्पादनम् अस्ति।

4. आरोग्यं धर्मार्थकाममोक्षाणां साधनं भवति अतः आरोग्यदानेन पुरुषार्थचतुष्टयस्य सम्पादनं भवति।

5. शौर्यम्, आशुक्रिया, शस्त्रतैक्ष्ण्यम्, अस्वेदवेपथुः, असम्मोहश्च शस्त्रकर्मचिकित्सकस्य प्रशस्तानि लक्षणानि सन्ति।

6.

| पशुमुखाकृतिसदृशानि सवस्तिकयन्त्राणि | पक्षिचञ्चुसदृशानि यन्त्राणि |
|---|---|
| 1. सिंहयन्त्रम् | 1. काकयन्त्रम् |
| 2. व्याघ्रयन्त्रम् | 2. कङ्कयन्त्रम् |
| 3. वृकयन्त्रम् | 3. कुररयन्त्रम् |
| 4. तरक्षुयन्त्रम् | 4. चाषयन्त्रम् |





5. ऋक्षयन्त्रम्
6. द्वीपियन्त्रम्
7. शृगालयन्त्रम्
8. मृगयन्त्रम्

5. श्येनयन्त्रम्
6. शशघाटयन्त्रम्
7. गृध्रयन्त्रम्
8. क्रौञ्चयन्त्रम्
9. अञ्जलिकर्णयन्त्रम्

7. स्वयं कुरुत।

8. (i) मया मन्त्रं स्मर्तव्यम्। (ii) तेन गृहं गन्तव्यम्। (iii) कोऽपि जनः न हन्तव्यः। (iv) कार्यं शीघ्रं करणीयम्। (v) मया एका कविता लेखनीया।

9. (i) रचितः (ii) वर्णितानि (iii) उल्लिखिता (iv) प्रदर्शिता (v) आविष्कृता (vi) अङ्गीकृतम् (vii) उक्तम् (viii) पुरस्कृताम् (ix) उपेताम् (x) दत्तम्

10. (i) नाम + उल्लेखः – गुणसन्धिः

(ii) असम्मोहः + च – विसर्गसन्धिः

(iii) तत् + अधीनानि – व्यञ्जनसन्धिः

(iv) उत् + लिखिताः – व्यञ्जनसन्धिः

(v) आविः + कृता – विसर्गसन्धिः

(vi) अतः + एव – विसर्गसन्धिः

(vii) पुरः + कृतम् – विसर्गसन्धिः।

11. (i) अमु×चत् (ii) मु×चन्ति (iii) इच्छामि (iv) ऐच्छत्

(v) पृच्छतु (vi) प्रक्ष्यामः (vii) अविशत् (viii) विशेयुः